तुरीयकूटमेतावत्सङ्ख्यं जप्त्वा निवेदयेत् ।
संस्तुत्वा परमाकाशे सहस्रारवराटके ॥७॥
समुद्रास्य तथाऽऽत्मानं ध्यायेत् कामकलात्मकम् ।
एतद्विद्योपासकानानामेतत् सन्ध्यात्रितुष्टयम् ॥८॥
आवश्यकं न चाऽन्येषां मन्त्राणां समुदीरितम् ।
बाह्याशक्तौ ध्यानरूपा सन्ध्यानक्तं विधीयते ॥९॥
उपस्थानं कल्पलता-विद्यायाः समुदीरितम् ।
तारं वाचं श्रियं मायां वाद्यं कामं वराहकम्[1] ॥१०॥
गणेशबीजं गुगुरी ततः पञ्चदशाक्षरी ।
ऐं क्लीं सौः कथितं बीजं त्रितयं त्रैपुरं ततः ॥११॥
पूर्वानुषङ्गमेकोनत्रिंशद्भिः कथितोऽक्षरैः ।
पर्यायेष्वनुषङ्गाभ्यां चतुर्ष्वपि पठेदृचः ॥१२॥
ऋचो यदद्यकाद्याः आनुलोम्येन षट् पठेत् ।
ता एव प्रतिलोम्येन पुनः षष्ठीं विना पठेत् ॥१३॥

---

१. वराहकं नाम ग्लौमित्यर्थः ।

एवमेकां दशर्चः स्युरनुषङ्गद्वयान्विताः ।
गंक्षिप्रप्रसादना यस्माद् गणपतये ततः ॥१४॥
योजयेद् वरवरद पाशमायां कुशांस्ततः ।
सर्वजनं मे वशमानय स्वाहेति वै पठेत् ॥१५॥
सौः क्लीमिति चाऽन्ते च स्यादनुषङ्गोऽयमुत्तरः ।
देव्युत्तरानुषङ्गोऽयं भवेत् षट्त्रिंशदक्षरः ।
पूर्वोत्तरानुषङ्गाभ्यां पठेदेका दशाऽप्यृचः ॥१६॥

[एकादशाप्यृच इत्यत्र यद्यपि एकादशाप्यृच इत्यनेन एकादशैव ऋचः पूर्वोत्तरानुषङ्गाभ्यां पठेदित्युक्तम् । तथाऽपि कुमारसंहितायां तारादिमन्त्रे बालान्ते इत्यादि बालायाः प्रतिरोहान्तमित्यनेन ग्रन्थेनाऽग्रे वक्ष्यमाणत्वात् । पूर्वोत्तरानुषङ्गाभ्यामित्यत्र 'अपि'शब्देन च द्वादशीमपि पूर्वोत्तरानुषङ्गाभ्यां योजयेदित्यर्थः ।]

यदद्यकच्चगायत्री त्र्यम्बकं जातवेदसे ।
समानो मन्त्र इत्येताः प्रतिलोम्ये दशाभवन् ॥१७॥
षष्ठी प्रतिपर्यायं भिन्नाऽभिन्नामुदीरयेत् ।
सं समिद्युवसे आद्ये संगच्छध्वं द्वितीयके ॥१८॥
समानो मन्त्रस्तार्तीये समानी वश्चतुर्थके ।
एकादश पठित्वैवमृचाऽथ द्वादशीं पठेत् ॥१९॥

भिन्नाऽभिन्ना द्वादश स्युः पर्यायेषु चतुर्ष्वपि ।
गणानां त्वा गणपतिमग्ने मन्युमतः परम् ॥२०॥
यो मामग्ने तृतीये स्यादजैष्माद्या चतुर्थके ।
व्याहृतिः प्रथमं चोक्ता भद्रन्न इति मन्त्रकः ॥२१॥
तत आद्ये तु भद्रन्नो मरुतामोजसे ततः ।
तृतीय इद्रो निश्वस्य अन्ते शन्नो भवेति वै ॥२२॥
पठेदों ह्रीं वं ठममृततो रुद्राय वै ततः ।
पाशं मायां कुशानुक्ता प्रतिकूलं म इत्यतः । २३॥
नश्यत्वनुकूल मे वशमानय ठ-द्वयम् ।
दमयन्ती-नलाभ्यां चेदृग्-द्वयं ततः परम् ॥२४॥
तारो ह्रीं वं ठमित्यादि चतुर्ष्वेवं समं भवेत् ।
एकैव पञ्चमी षष्ठी सप्तमी च तृतीयके ॥२५॥
एवं कल्पलताख्योपस्थानस्यैष क्रमो भवेत् ।
प्रयोगपारिजाताख्ये आथर्वणविधिं स्मृतः ॥२६॥

इति वाञ्छा-उद्धारः समाप्तः ।

०

अन्यत्रापि कुमारसंहितायाम् ।

शिव उवाच—

शृणु देव ! प्रवक्ष्यामि वाञ्छाकल्पलतामहम् ।

श्रीविद्यागणनाथस्य रहस्यं परमादभुतम् ॥२७॥
आदौ गुरून् गणाध्यक्षं क्षेत्रपालं सरस्वतीम् ।
नत्वाऽस्य मन्त्रमुच्चार्य कृत्वा तालत्रयं ततः ॥२८॥

प्राणानायम्य मूलेन तेन त्रिर्व्यापयेदिति ।
ततो मन्त्रजपं कुर्याद्दृषि-दैवत-पूर्वकम् ॥२९॥

अस्य विघ्नगणेशस्य वाञ्छाकल्पलतामनोः ।
नानासूक्तस्य समूहस्य ऋषयः कथिता मया ॥३०॥
आनन्दभैरवो देवो गणकः सर्वमन्त्रवित् ।
आङ्गिरसः कश्यपश्च वशिष्ठऋषिसत्तमः ॥३१॥
विश्वामित्रश्च सवादो नानाऋषिरुदाहृतः ।
छन्दांसि सुबहून्यत्र ज्ञातव्यानि पृथक् पृथक् ॥३२॥
देवीपूर्वा निचृत्पूर्वा गायत्री नुष्टुभं तथा ।
देवता च महादेवी श्रीमत्त्रिपुरसुन्दरि ! ॥३३॥
गणेशाग्निश्च संवादोऽमृताख्यो रुद्र एव च ।
श्रीं ह्रीं क्लीं बीजशक्तिं च कीलकं च महेश्वरि!॥३४॥
वाञ्छितार्थप्रसिद्ध्यर्थं विनियोग इहोच्यते ।
प्रोक्ते ह्रीं श्रीं बीजशक्तिं स्वाहा कीलकमुच्यते ॥३५॥

करान्नन्यासभेदस्य विधिरेष इहोच्यते ।
बालां प्रथममुच्चार्य संबुध्या सुन्दरि ! वदेत् ॥३६॥
ह्रीमुक्तानुक्रमेणैव सर्वज्ञायै वदेत्ततः ।
मायां च जातिभिः षड्भिः दीर्घाद्यैर्ह्रीमिति प्रिये!॥३७॥
दीर्घसंयुक्तगं पञ्चभिर्ब्रह्मभिः क्रमात् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥३८॥
सर्वात्मेन च देवेशि ! कुर्यान्नित्यं षडङ्गकम् ।
हेमाद्रौ हेमपीठेति ध्यात्वा श्रीत्रिपुरां पराम् ॥३९॥
बीजापूरेति विघ्नेशं धवलेत्यादिनाऽपि च ।
द्वाभ्यामित्युदितं ध्यानं सर्वतन्त्रे तदुच्यते ॥४०॥
स्फुटितेति शिवं ध्यायेत् सर्वकामार्थसिद्धिदम् ।
एवं ध्यात्वा शुभे देशे तद्भेदेन[1] च साधकः ॥४१॥

ध्यानानि प्रयोगे वक्ष्यन्ते ।

जपेदिष्ट-सिद्ध्यर्थं [2]विद्याग्रहणसंज्ञितम् ॥४२॥
अष्टवा जपेन्नित्यं सर्वाभीष्टमवाप्नुयात् ।
जपेत् षोडशसाहस्रं तर्पणाहुतियोगतः ॥४३॥

---

१. तद्भेदेन वैदिकमन्त्रभेदेन इत्यर्थः । २. विद्याग्रहणं दीक्षेत्यर्थः ।

श्रीविद्या गणनाथस्य ऋग्भिः सूक्तमलङ्कृतम् ।
श्रीविद्यायाश्च सर्वार्थसाधिन्याः साधितुं मनुम् ॥४४॥
पुरश्चर्याविधानेन साधकः सर्वदा जपेत् ।
धर्ममर्थं च कामं च दैवतैक्यं च विन्दति ॥४५॥
किमत्र बहुनोक्तेन यद्यदिच्छति साधकः ।
तत्सर्वं लभते नित्यं वाञ्छाकल्पलतामनोः ॥४६॥
आनुपूर्व्या च ऋग्भेदं सूक्तं चैव पृथक् पृथक् ।
साधकानां सुबोधाय वाञ्छितार्थं प्रसिद्धये ॥४७॥

शिव उवाच

मन्त्रोद्धारमशेषेण प्रवक्ष्यामि कुलेश्वरि !
अप्रकाश्योऽयमुद्धारः सर्वत्र हितकांक्षिभिः ॥४८॥

तारवाग्भवरमा भुवनेशी
वाद्यकामधरणो गणनाथात् ।
[1]यक्षबीजयुगलं तुरि दीर्घं
श्रीमहात्रिपुर-सुन्दरि-मनुः ॥४९॥
[2]तत्सुतां मनुमथादितो वदेत्
संवदेदथ यदद्यकञ्च ऋक् ।

---

१. यक्षबीजयुगलं नाम 'गुगुरी' इति ज्ञेयम् । २. तत्सुतां बालाबीजत्रयमित्यर्थः ।

विघ्नबीजमनुवर्ण्यसाधको
[1]मन्त्रराजमथ संवदेत् क्रमात् ॥५०॥
क्षिप्रप्रसादनायेति तथा गणपतिं वदेत् ।
चतुर्थ्यां वरवरद-पदमुक्त्वा वेदत्ततः ॥५१॥
पाशशक्त्यं कुशैः सर्वजनं मे वशमानय ।
अवरोहेण बालायाः स्वाहान्ते त्र्यक्षरीं वदेत् ॥५२॥
तारादि-मन्त्रे बालान्ते वदेत् सावित्रिकामपि ।
त्र्यम्बकं मनुं जातवेदो मन्त्रमथो वदेत् ॥५३॥

समानो मन्त्रमप्यत्र संसमिद्युवसे तथा ।
एवमारोहमार्गेण प्रोक्ता ऋग्मन्त्रजातयः ॥५४॥
समानो मन्त्रमारभ्य प्रतिरोहं वदेत्ततः ।
ऋचं यदद्यकच्चेति प्रतिरोहावसानकम् ॥५५॥
गणानां त्वा ऋचं वाऽपि द्वादशीं योजयेदिह ।
बालायाः प्रतिरोहान्तं वदेत् तद्वदथोत्तरम् ॥५६॥
व्याहृतिं प्रथमामुक्त्वा भद्रकाली मन्त्रमावदेत् ।
प्रणवं भुवनेशीं च वं ठं बीजद्वयं वदेत् ॥५७॥

---

१. मन्त्रराजक्षिप्रगणपतय इत्यर्थः ।

वदेदमृतरुद्रं च चतुर्थं पाशबीजकम् ।
हल्लेखामङ्कुश प्रोक्ता प्रतिकूलं पदं वदेत् ॥५८॥
मे नश्यत्वनुकूलं मे द्विर्वदेद् वशमानय ।
वह्निजायां तमुक्त्वाऽथ नलसूक्तं वदेत् ततः ॥५९॥
नलसूक्तं दमयन्ती-नलाभ्यामिति कथ्यते ।
दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोषप्रशान्तये । ६०॥
ऐकमत्यं भवेदेषा ब्राह्मणानां पृथग्धियाम् ।
निर्वैरतां च जायेत संवादाग्ने ! प्रसीद मे ॥६१॥
जपित्वैवं चतुर्वारमेकावृत्ति भवेत्तदा ।
अष्टवारं जपेन्नित्यमष्टसिद्धिर्भविष्यति ॥६२॥
प्रणवादि यदद्येति गायत्री त्र्यम्बकं तथा ।
जातवेद समानश्च संसमिद्युवसे तथा ॥६३॥
एवमारोहरूपोऽयमवरोहस्तथोच्यते ।
समानो मन्त्रमाख्याय यदद्येति ऋगन्तकम् ॥६४॥
आरोहे तु द्वितीयस्य दलस्यापि तथोच्यते ।
संगच्छेति वदेत्यष्टे अवरोहः समानकः ॥६५॥

अत्रापि द्वादशस्थाने अग्ने मन्युं वदेन्मनुम् ।
द्वितीयां व्याहृतिं प्रोक्ता मरुतामोजसे वदेत् ॥६६॥
तृतीयस्य दलस्यापि षष्ठस्थाने तथा वदेत् ।
समानो मन्त्रमत्रापि द्वादशे योजयेत्तथा ॥६७॥
यो मामग्ने जपित्वा तु वह्निजायां तमावदेत् ।
तृतीयायां व्याहृतीं ब्रूयादिन्द्रो विश्वस्य राजति ॥६८॥
दलस्यापि चतुर्थस्य षष्ठस्थाने तथा वदेत् ।
समानीव ऋचं चैव अजैष्मा द्वादशी भवेत् ॥६९॥
ऋगन्ते प्रजपेत्तत्र व्याहृती त्रितयं क्रमात् ।
ततः शन्नो भव ब्रूयात् द्विपदे शं चतुष्पदे । ७०॥
उत्तरं दलमप्यत्र योजनीयं महेश्वरि ! ।
जपित्वा साधकश्रेष्ठश्चतुर्वारं पृथक् पृथक् ॥७१॥
इत्येतत् कथितं गुह्यं भुक्ति-मुक्तिप्रदायके ! ।
जपेत् षोडशसाहस्रं षट्सहस्रमथापि च ॥७२॥
पायसेन हुनेद् देवी नारिकेलफलैस्तिलैः ।
असाध्यं साधयेल्लोके अवश्यं वशमानयेत् ॥
किमत्र बहुनोक्तेन सर्वान् कामानवाप्नुयात् ॥७३॥

इति कौमारसंहितायां वाञ्छाकल्पलतामन्त्रोद्धारो
नाम द्वादशः पटलः ।

तन्त्रान्तरे–

वाञ्छाकल्पलतायास्तु न होमो न च तर्पणम् ।
स्मरणादेव विद्यायाः मुक्तो भवति साधकः ॥७४॥
एकावृत्त्या वशेल्लक्ष्मी पञ्चावृत्त्या वशं जगत् ।
दशावृत्त्या तथा विष्ण रुद्रशक्तिर्भवेदिह ॥
सार्वभौमः शतावृत्त्या भवत्येव न संशयः ॥७५॥

तन्त्रान्तरेऽपि–

आवर्तनत्रये लक्ष्मी पञ्चावृत्तौ जगद्-वशम् ।
दशावृत्तौ शिवादीनां देवानां शक्तिभाग् भवेत्॥७६॥
लक्षावृत्तौ सार्वभौमो दरिद्रोऽपि भवेन्नरः ।
नार्थवादोऽथर्वणस्य वसिष्ठवचनं यथा ।७७॥

पुरश्चरणे त्ववश्यं होमः । वाञ्छाकल्पलतायाश्चेति नित्यं परम् ।

अथ मूलवाक्यानुसारीप्रयोगः

प्रथमकूटमुच्चार्य आत्मतत्त्वाय स्वाहा । द्वितीयकूटमुच्चार्य विद्यातत्त्वाय स्वाहा । तृतीयकूटमुच्चार्य शिवतत्त्वाय स्वाहा । खान्यङ्गिः संस्पृश्य, प्राणायामं पूर्ववत् कृत्वा । इष्टदेवता-प्रीत्यर्थं तुरीयां सन्ध्यां करिष्ये । वामहस्ते जलं गृहीत्वा, अङ्गुलि-विवरगलद्-बिन्दुभिः पूर्ववच्छिरः प्रोक्ष्य, पूर्ववत् प्राश्य, पुनः

प्रोक्ष्याऽघमर्षणं कुर्यात्। ऐं आत्मतत्त्वं शोधयामि। क्लीं विद्यातत्त्वं शोधयामि। सौः शिवतत्त्वं शोधयामि। खाग्नि स्पृश्य। सौः शिवतत्त्वं शोधयामि। क्लीं विद्यातत्त्वं शोधयामि। ऐं आत्मतत्त्वं शोधयामि। ऐं क्लीं सौः सर्वतत्त्वं शोधयामि। खाग्नि स्पृशेत्। मूलाधारादि-ब्रह्मरन्ध्रान्तं तुर्यां विद्यां विभाव्य,

वह्न्यासाध्वनावहिस्तारकमण्डलात् ब्रह्मरूपम्।
भास्वत्-रत्नौघ-मुकुटां स्फुरच्चन्द्रकलाधराम्॥
सद्यः सन्तप्तहेमाभां सूर्यमण्डलरूपिणीम्।
पाशाङ्कुशाभयवरां स्मरन्नथ जपेन्नरः॥१॥

—इति तुरीयविद्यया प्राग्वत्प्रणवत्रितारोत्तरं तुरीयामुक्त्वा, तुर्येश्वरीपादुकां पूजयामि। यथा—ऐं ह्रीं श्रीं हसकल हसकहल सकलह्रीं तुर्येश्वरीपादुकां पूजयामि। मानसैरभ्यर्च्य। अञ्जलौ जलं गृहीत्वा, ह्रीं त्रिपुरसुन्दर्यै विद्महे कामेश्वर्यै धीमहि। तन्नः क्लिन्ने प्रचोदयात्।

चन्द्रमण्डलमध्यस्थायै इदमर्घ्यं समर्पयामि स्त्रिः। ह्रीं नमः स्वाहा। हंसः मार्तण्डभैरवाय प्रकाशशक्तिसहिताय द्वादशकलात्मने स-ग्रह-राशि-नक्षत्र-तिथि-वार-योग-करण-परिवृत्तासन-सम्पद-स्थिताय श्रीचक्रसूर्यायाऽर्घ्यं समर्पयामि स्वाहा। तन्मूर्ध्नि निवेदयेत्। त्रिर्मूलेन सन्तर्प्य। ऋष्यादि विधाय, यथाशक्ति गायत्रीं मूलं च जप्त्वा, गुरुं नत्वा, एवं तुरीयां सन्ध्यां विधाय।

ईश्वर उवाच

शृणु ब्रह्मन् ! यथान्यायं विद्यागणपतेर्मनुम् ।
सर्वैश्वर्यप्रदं दिव्यं सर्वलोक-विमोहनम् ॥ २ ॥
धर्मा-ऽर्थ-काम-मोक्षाणां साधनं सर्वसिद्धिदम् ।
ऋषिर्विद्या गणेशस्य दक्षिणामूर्तिरुच्यते ॥ ३ ॥
छन्दश्च देवी गायत्री देवो विद्यागणेश्वरः ।
गं बीजं ह्रीं ततः शक्तिर्विनियोगः प्रयोजने ॥ ४ ॥
पञ्चबीजसमायुक्तं ह्रामित्यादि षडङ्गके ।
अथ ध्यानं प्रवक्ष्यामि विद्यागणपतेर्विभो ! ॥ ५ ॥

'करीन्द्रवदनमि'त्यादि 'सर्वार्थसिद्धये' इत्यन्तम् ।

एवं ध्यात्वा जपेन्नित्यं प्रातः षोडशवारकम् ।
सर्वान् कामानवाप्नोति विघ्नेशः संप्रसीदति ॥ ६ ॥
मन्त्रोद्धारं प्रवक्ष्यामि विघ्नराजस्य धीमतः ।
प्रणवं पञ्चबीजाद्यं विद्या प्रथमखण्डकम् ॥ ७ ॥
गणपतिं चतुर्थ्यन्तं द्वितीयं खण्डमुच्यते ।
वद-द्वयान्तमुच्चार्य तृतीयं खण्डमप्यथा ॥ ८ ॥
पश्चात् सर्वजनं मेऽथ वशमानय संयुतम् ।
स्वाहेत्युक्ते गणेशस्य मन्त्रोऽयं सर्वसिद्धिदः ॥ ९ ॥

धन-धान्यप्रदः सद्यः सर्वलोकवशङ्करः ।
आयुष्करः प्रजावृद्धिः करो व्याधिविनाशकृत् ॥१०॥

अस्य श्रीविद्यागणपतिमहामन्त्रस्य, दक्षिणामूर्ति ऋषिः, गायत्री छन्दः, विद्यागणपतिर्देवता, गं बीजम्, ह्रीं शक्तिः, श्रीविद्यागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

दक्षिणामूर्तिऋषिः शिरसि । गायत्रीछन्दसे नमः मुखे । श्रीविद्यागणपतिर्देवता हृदये । गं बीजं नाभौ । ह्रीं शक्तिः गुह्ये । विनियोगः, पादयोः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं हां अङ्गुष्ठाभ्यां नमः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं ह्रीं तर्जनीभ्यां नमः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं हूं मध्यमाभ्यां नमः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं हैं अनामिकाभ्यां नमः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं ह्रौं कनिष्ठिकाभ्यां नमः । ॐ श्रीं ह्रीं क्लीं ग्लौं गं हः करतल-करपृष्ठाभ्यां नमः । एवं हृदयादि-न्यासः ।

करीन्द्रवदनं वन्दे त्रिनेत्रं चन्द्रशेखरम् ।
अधस्ताद् वनिताकारं सिन्दूरारुणविग्रहम् ॥११॥
उत्तुङ्ग-स्तन-भारोद्यद्-रत्नभूषण-भूषितम् ।
क्वणत्-किङ्किणिका-काञ्ची-मण्डनूपुरभूषितम् ॥१२॥
बीजा-पूर-गदां चापं शूलं चक्रं सरोरुहम् ।
पाशोत्पले च बीह्यग्रं स्वदन्तं रत्नकुम्भकम् ॥१३॥

बिभ्रत्सकङ्कणैर्हस्तैरुभाभ्यां हेमशृङ्खलम् ।
बिभ्रतं विद्यागणपं ध्यायेत् सर्वार्थसिद्धये ॥१४॥

इति ध्यात्वा मुद्राः प्रदर्श्य । मानसोपचारैः सम्पूज्य । योन्या प्रणम्य । ॐ श्रीं ह्रीं क्लीं ग्लौं गं कएईलह्रीं गणपतये हसकहलह्रीं वरवरद सकलह्रीं सर्वजनं मे वशमानय स्वाहा । षोडशवारं जप्त्वा, पुनर्ऋष्यादि पूजान्तं विधाय ।

गुह्याऽतिगुह्यगोप्ता त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु देवेश ! त्वत्प्रसादान्मयि स्थिरा ॥१५॥

इति हस्तेषु निवदयेत् । श्रीविद्यागणपतिः प्रीयन्ताम् । ततो हेमाद्रावितिध्याने कालविधानादन्त्ययामे वाञ्छां कुर्यात् ।

यथा--

श्रीगुरुभ्यो० ॥१॥ गणपतये० ॥२॥ क्षेत्रपालाय० ॥३॥ सरस्वत्यै० ॥४॥ मूलमुच्चार्य तालत्रयं कृत्वा । मूलेन प्राणायम्य त्रयं कृत्वा । अस्य श्रीवाञ्छाकल्पलतामन्त्रस्य, आनन्दभैरव - गणका-ऽङ्गिरस्-कश्यप-वसिष्ठ-विश्वामित्र-संवादा ऋषयः, देवी गायत्री, निचृद्गायत्र्यनुष्टुप्-छन्दांसि श्रीमन्महात्रिपुरसुन्दरी-गणेश-संवादाग्न्यमृतरुद्रो देवताः श्रीं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, वाञ्छितार्थप्रसिद्ध्यर्थे जपे विनियोगः ।

आनन्दभैरव - गणका - ऽङ्गिरस् - कश्यप - वसिष्ठ-विश्वामित्र-संवादऋषिभ्यो नमः, शिरसि। देवीगायत्री निचृद्गायत्री अनुष्टुप्-छन्दसेभ्यो नमः, मुखे। श्रीमन्महात्रिपुरसुन्दरी-गणेश-संवादाग्न्यमृतरुद्रेभ्यो नमः, हृदये। श्रीं बीजाय नमः, नाभौ। ह्रीं शक्तये नमः, गुह्ये। क्लीं कीलकाय नमः, आधारे। मूलेन व्यापकं चेत्। ऐं क्लीं सौः सुन्दरी ह्रीं सर्वज्ञायै ह्रां गां ब्रह्मात्मन्यै अङ्गुष्ठाभ्यां नमः। ऐं क्लीं सौः सुन्दरी ह्रीं नित्यतृप्तायै ह्रीं गीं विष्णात्मन्यै तर्जनीभ्यां नमः। ऐं क्लीं सौः सुन्दरी ह्रीं अनादिबोधितायै हूं गूं रुद्रात्मन्यै मध्यमाभ्यां नमः। ऐं क्लीं सौः सुन्दरी ह्रीं स्वतन्त्रायै ह्रैं गैं ईश्वरात्मन्यै अनामिकायै नमः। ऐं क्लीं सौः सुन्दरी ह्रीं नित्यमलुप्तायै ह्रौं गौं सदाशिवात्मन्यै कनिष्ठिकायै नमः। ऐं क्लीं सौः सुन्दरी ह्रीं अनन्तायै ह्रः गः सर्वात्मन्यै करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि।

ध्यानम्—

हेमाद्रौ हेमपीठस्थित-विविधसुरैरीड्यमानां च राजत्
पुष्पेश्विक्षवासपाशाङ्कुश-कर-कमलां रक्तवेशातिरक्ताम्।
दिक्षूद्यद्भिश्चतुर्भिर्मणिमयकलशैः पञ्चशक्त्यैकविद्यां
स्वच्छां कृत्साभिषेकां भजत भगवतीं भूतिदामन्त्रयामे।

बीजा-पूर-गदेक्षु-कार्मुक-रुजारक्ता-ऽब्ज-पाशोत्पल-
व्रीह्यग्र-स्वविषाण-रत्नकलश-प्रोद्यत्-कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरया श्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्ति-विपत्ति-संस्थितिकरो विघ्नो विशिष्टार्थदः।

धवल नलिन-राजच्चन्द्रमध्ये निषण्णां
स्वकर-कलितपाशं साभयं साङ्कुशं च ।
अमृत-वपुषमिन्दु-क्षीरवर्णं त्रिनेत्रं
प्रणमत सुरवन्द्यमिक्षुसंवादमम्बिम् ॥१८॥

स्फुटित-नलिनसंस्थं मौलिबद्धेन्दुरेखा
गलदमृतरसार्द्रं चन्द्रवह्न्यर्कनेत्रम् ।
स्वकर-कलितमुद्रा वेदपाशाक्षमालां
स्फाटक-रजतमुद्रा गौरमीशं नमामि ॥१९॥

इति ध्यात्वा मुद्रां प्रदर्श्य, मानसैः सम्पूज्य, जपेत्, यथा—

---

१. मुद्रा ज्ञानमुद्रेत्यर्थः । वेदशब्देन पुस्तकमुद्रा इति । यथा—
तर्जन्यङ्गुष्ठको सक्ताग्रगतो हृदि विन्यसेत ।
वामहस्ताम्बुजं वामे जानुमूर्द्धनि विन्यसेत् ॥
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ॥
अपि च—
ज्ञानमुद्रा हृदि न्यस्तो तर्जन्यङ्गुष्ठको युतो ।
वामहस्ताम्बुजं वा तु यदि मूर्द्धनि विन्यसेत् ॥— मेरुतन्त्र, ८प्र०, श्लोक ६३।
वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ॥—मन्त्रमहोदधिः ।

ॐ ऐं श्रीं ह्रीं लं वलीं ग्लौं गं गुगुरी कएईलह्रीं हसकहलह्रीं सकलह्रीं यदद्यकच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे । गं क्षिप्रप्रसादनाय गं गणपतये वरवरद आं ह्रीं क्रों सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं ॥ १ ॥

ॐ ऐं श्रीं ह्रीं लं क्लीं ग्लौं गं गुगुरी कएईलह्रीं हसकहलह्रीं सकलह्रीं ऐं क्लीं सौः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । गं क्षिप्रप्रसादनाय गं गणपतये वरवरद आं ह्रीं क्रों सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं ॥ २ ॥

ॐ ऐं श्रीं ह्रीं लं क्लीं ग्लौं गं गुगुरी कएईलह्रीं हसकहलह्रीं सकलह्रीं ऐं क्लीं सौः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् । गं क्षिप्रप्रसादनाय गं गणपतये वरवरद आं ह्रीं क्रों सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं ॥ ३ ॥

ॐ २८ ॥ जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ गं ३५ ॥ ४ ॥ ॐ २८ ॥ समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥ गं ३५ ॥ ५ ॥ ॐ २८ । सं समिद्युवसे वृषन्नग्ने विश्वान्यर्यमा । इलस्पदे समिद्युध्यसे स नो वसून्या भर ॥ गं ३५ ॥ ६ ॥ ॐ २८ ॥

समानो मन्त्र० ॥ गं ३५ ॥ ७ ॥ ॐ २८ ॥ जातवेदसे० गं ३५ ॥ ८ ॥ ॐ २८ ॥ त्र्यम्बकं यजामहे० ॥ गं ३५ ॥९॥ ॐ २८ ॥ तत्सवितु० ॥ गं ३५ ॥१०॥ ॐ २८ ॥ यदद्यकच्च०॥ गं ३५ ॥११॥ ॐ २८ ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीद सादनम् ॥ गं ३५ ॥१२॥ भूः ॥ भद्रन्नो अपि वातय मनः ॥ ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय वशमानय स्वाहा ।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोषप्रशान्तये ॥२०॥
ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम् ।
निर्वैरतां च जायेत संवादाग्ने प्रसीद मे ॥२१॥

इति प्रथमपर्यायः ॥१॥

०

अथ द्वितीयपर्यायः

ॐ २८ ॥ यदद्य कच्च० गं ३५ ॥१॥ ॐ २८ ॥ तत्सवितु० गं ३५ ॥२॥ ॐ २८ ॥ त्र्यम्बकं० ३५ । ३॥ ॐ २८ ॥ जातवेदसे० गं ३५ । ४॥ ॐ २८ ॥ समानो मन्त्र० गं ३५ ॥५॥ ॐ २८ ॥ सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे संजानाना ऽउपासते गं ३५ ॥६॥ ॐ २८ ॥ समानो० गं ३५ ॥७॥ ॐ २८ ॥ जातवेदसे० गं ३५ ॥८॥

ॐ २८ ॥ त्र्यम्बकं यजा० गं ३५ ॥९॥ ॐ २८ ॥ तत्सवितु० गं ३५ ॥१०॥ ॐ २८ ॥ यदद्य० गं ३५ ॥११॥ ॐ २८ ॥ अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परि पाहि नस्त्वम् ॥ प्रत्यञ्चो यन्तु नियुतः पुनस्ते३ मैषां चित्तं प्रबुधां वि नेशत् गं ३५ ॥१२॥ भुवः मरुतामोजसे स्वाहा ॥ ॐ ह्रीं वं ठं अमृत-रुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं वशमानय वश-मानय स्वाहा ।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोषप्रशान्तये ॥ १ ॥
ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम् ।
निर्वैरतां च जायेत संवादाग्ने प्रसीद मे ॥ २ ॥

इति द्वितीयपर्यायः ॥२॥

०

अथ तृतीयपर्यायः

ॐ २८ ॥ यदद्य कच्च० गं ३५ ॥१॥ ॐ २८ ॥ तत्स-वितु० गं ३५ ॥२॥ ॐ २८ ॥ त्र्यम्बकं० गं ३५ ॥३॥ ॐ २८॥ जातवेदसे० गं ३५ ॥४॥ ॐ २८॥ समानो० गं ३५॥५॥ ॐ २८ ॥ समानो मन्त्र० गं ३५ ॥६॥ ॐ २८॥ समानो० गं ३५ ॥७॥ ॐ २८ ॥ जातवेद० गं ३५ ॥८॥ ॐ २८ ॥ त्र्यम्बकं० गं ३५ ॥९॥ ॐ २८ ॥ तत्सवि० गं ३५ ॥१०॥ ॐ २८ ॥ यदद्य० गं ३५ ॥११॥ ॐ २८ ॥ यो मामग्ने

भागिनँ् सं तमथा भागं चिकीर्षति ॥ अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा गं ३५ ॥१२॥ स्वः इन्द्रो विश्वस्य राजति । ॐ ह्रीं वँ ठं अमृतरुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा ।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोषप्रशान्तये ॥ १ ॥
ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम् ।
निर्वैरतां च जायेत संवादाग्ने ! प्रसीद मे ॥ २ ॥

इति तृतीयपर्यायः ॥३॥

०

अथ चतुर्थपर्यायः

ॐ २८ ॥ यद्य कच्च० गं ३५ ॥१॥ ॐ २८ ॥ तत्सवितु० गं ३५ ॥२॥ ॐ २८ ॥ त्र्यम्बकं० गं ३५ ॥३॥ ॐ २८ ॥ जातवेदसे० गं ३५ ॥४॥ ॐ २८ ॥ समानो० गं ३५ ॥५॥ ॐ २८ ॥ समानी व ऽआकूतिः समानो हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति गं ३५ ॥६॥ ॐ २८ ॥ समानो० गं ३५ ॥७॥ ॐ २८ ॥ जातवेदसे० गं ३५ ॥८॥ ॐ २८ ॥ त्र्यम्बकं० गं ३५ ॥९॥ ॐ २८ ॥ तत्सवि० गं ३५ ॥१०॥ ॐ २८ ॥ यदद्य० गं ३५ ॥११॥ ॐ २८ ॥ अजैष्माद्यासनाम चाऽभूमानागसो वयम् । जाग्रत्स्वप्नः सङ्कल्पः पापो यं द्विष्मस्तं स ऽऋच्छतु यो नो द्वेष्टि तमृच्छतु

गं ३५॥१२॥ भूर्भुवः स्वः। शन्नो भव द्विपदे शं चतुष्पदे ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रों प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा।

दमयन्ती-नलाभ्यां च नमस्कारं करोम्यहम्।
अविवादो भवेदत्र कलिदोषप्रशान्तये॥ १॥
ऐकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम्।
निरतां च जायेत संवादाग्ने! प्रसीद मे॥ २॥

इति चतुर्थः जपित्वा,

गुह्याऽतिगुह्यगोप्त्री त्वं गृहाणाऽस्मत्कृतं जपम्।
सिद्धिर्भवतु देवेशि! त्वत्प्रसादान्मयि स्थिरा॥ ३॥

इति निवेदयेत्।

इति वाञ्छाकल्पताप्रयोगो मूलवाक्यतः।

उद्धृत्य बुद्धिराजेन व्रजराजात्मजेन वै।
प्रयोगपारिजाताख्योऽथर्वणात् सुविमृश्य च॥ ४॥
कुमारसंहितां चैव विचार्य प्रोक्त एव हि।
निर्मत्सरैः सुधीवृन्दैर्ध्येयः स्वेष्टार्थसिद्धये॥ ५॥

इति व्याकरणाचार्य - साहित्यवारिधि - आचार्यपण्डित-श्रीशिवदत्तमिश्रशास्त्रि-सङ्कलितायां वाञ्छाकल्पलतायां श्रीबुद्धिराजविरचितो वाञ्छाकल्पलताप्रयोगः समाप्तः।

शुभं भूयात् [वि० सं० २०२६]

परिशिष्टम्

भूशुद्धिः

ॐ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति मन्त्रमुच्चार्य युगपद्वामपार्ष्णि-भूतलाघातत्रय-करास्फोटनत्रय-क्रूरदृष्टयवलोकनपूर्वक-तालत्रयेण भौमान्तरिक्ष-दिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् । इति भूशुद्धिः ।

१ तत्त्वशुद्धिः

श्वाससमीरं पिङ्गलया अन्तराकृष्य,

'ॐ मूलशृङ्गाटकात् सुषुम्नापथेन जीवशिवं परमशिवपदे योजयामि स्वाहा ।' इति मन्त्रेण मूलाधारस्थितं जीवात्मानं सुषुम्नावर्त्मना ब्रह्मरन्ध्रं नीत्वा, परमशिवेन एकीभूतं विभाव्य ईडया वायुं रेचयेत् ।

'ॐ यं १६. (इडया पूरयित्वा) संकोचशरीरं शोषय शोषय स्वाहा' इति निजशरीरं शोषितं विभाव्य पिङ्गलया रेचयेत् ।

'ॐ रं १६. (पिङ्गलया पूरयित्वा) सङ्कोचशरीरं दह दह पच पच स्वाहा' इति प्लुष्टं भस्मीकृतं च विभाव्य इडया रेचयेत् ।

'४ वं १६. (इडया पूरयित्वा) परमशिवामृतं वर्षय वर्षय स्वाहा' इति तद्भस्म सहस्रारेन्दु-मण्डल-विगलदमृतरसेन सिक्तं च विभाव्य पिङ्गलया रेचयेत् ।

'४ लं १६. (पिङ्गलया पूरयित्वा) शाम्भवशरीर-मुत्पादयोत्पादय स्वाहा' इति तद्भस्मनो दिव्यशरीरमुत्पन्नं विभाव्य इडया रेचयेत् ।

'४ हंसः सोऽहं (इडया पूरयित्वा) अवतर अवतर शिवपदात् जीव सुषुम्नापथेन प्रविश मूलशृङ्गाटकम् उल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोऽहं स्वाहा' इति परमशिवेनैकीकृतं जीवं पुनः सुषुम्नावर्त्मना मूलाधारे स्थापितं चिन्तयेत् । इति भूतशुद्धिः ।

अथ तुरीयसन्ध्याविधिः

मूलेन आचम्य, मूलेन त्रिः प्राणानायम्य, 'मनोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं' (देशकालौ संकीर्त्य) 'श्री-राजराजेश्वरीप्रीत्यर्थं' (देवीमानरीत्या सङ्कल्प्य) 'श्रीविद्या-प्रातःसन्ध्यामुपासिष्ये' ।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान् द्व्यष्ट-चतुष्क-षष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

गुरुपादुकामनुमुच्चार्य, सुमुखादिभिः पञ्चमुद्राभिः श्रीगुरुं प्रणम्य, मूलमन्त्रम् ऋष्यादिध्यानान्तं विधा, स्वपुरतः धेनु-मुद्रया जलममृतीकृत्य, मूलविद्यया अष्टवारमभिमन्त्र्य, तेन जलेन षोडशस्वरैः सविन्दुभिः ['अं नमः, आं नमः + + अः नमः' इति] मार्जयित्वा, दक्षिणहस्तेन जलमादाय, कादि-मान्तैः स्पर्शवर्णैः मूलविद्यया च ['कं नमः, खं नमः + + मं नमः, क–५ ह–६ स–४' इति] जलं पीत्वा, यादि-दशभिः मूलविद्यया च ['यं नमः, रं नमः + + क्षं नमः, क–५ ह–६ स–४' इति] शिरसि प्रोक्ष्य, सूर्यमण्डले देवीं यथोक्तरूपां ध्यायेत् ।

ध्यानम्—

सकुङ्कुम-विलेपनामलिक-चुम्बि-कस्तूरिकां
समन्द-हसितेक्षणां सशर-चाप-पाशाङ्कुशाम् ।
अशेष जन-मोहिनीमरुण-माल्य-भूषाम्बरां
जपा-कुसुम-भासुरां जपविधौ स्मरेदम्बिकाम् ॥
चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षु-पाशाङ्कुश-पुष्पबाण-हस्ते नमस्ते जगदेकमातः ॥

दक्षिणहस्ते जलमादाय, 'लं वं रं यं हं' इति त्रिरभिमन्त्र्य, 'क–५ ह–६ स–४' इति च त्रिरभिमन्त्र्य, तज्जलबिन्दुभिः वामाङ्गुष्ठानाभिकाभ्यां 'क–५ ह–६ स–४' इति स्वशिरसि

त्रिः प्रोक्ष्य, अवशिष्टजलं वामहस्ते निधाय, तेजोरूपं तज्जलम् इडयाऽऽकृष्य, स्वदेहान्तस्थितं सकलकलुषं प्रक्षालितं भावयित्वा, तज्जलं कृष्णवर्णं विभाव्य, पिङ्गलया बहिर्निर्गतं मत्वा, तज्जलं पुनः दक्षिणहस्ते कृत्वा, स्ववामभागे ज्वलद्वज्रशिलां ध्यात्वा, '४ श्लीं पशुं हुं फट्' इति तस्यां शिलायामास्फाल्य, हस्तौ प्रक्षाल्य, मूलविद्यया जलमादाय, 'क–१५' इति ब्रह्मरन्ध्रात् सहस्रदल-कमलगत-परमामृतेनैक्यीभूतं विभाव्य, राजदन्तविवरान् नेत्रमार्गेण निर्गमय्य, तज्जलं वामकरे निधाय, तेन जलेन 'अमृतमालिनी स्वाहा' इति मन्त्रेण सर्वाङ्गुलीभिः स्वशिरसि त्रिः प्रोक्ष्य, '४ क–५ आत्मतत्त्वं शोधयामि स्वाहा, ४ ह–६ विद्यातत्त्वं शोधयामि स्वाहा, ४ स–४ शिवतत्त्वं शोधयामि स्वाहा, ४ स–४ शिवतत्त्वं शोधयामि स्वाहा, ४ ह–६ विद्यातत्त्वं शोधयामि स्वाहा, क–५ आत्मतत्त्वं शोधयामि स्वाहा। ४ क–१५ सर्वतत्त्वं शोधयामि स्वाहा' इति त्रिधा। एवं नवधा जलं पिबेत्।

सहस्रारकमले मूलविद्यातुरीयकूटं त्रयोदशाक्षररूपं पद्मराग-समप्रभं ध्यात्वा, ब्रह्मरन्ध्रासापुटेन तारकमण्डलाद् बहिः परमाकाशे समावाह्य, तदुद्भूता भगवतीं तेजोरूपां ध्यायन् 'हसकल हसकहल सकलह्रीम्' इति तुरीयकूटमुच्चार्य 'श्रीमहात्रिपुरसुन्दरी-श्रीपादुकां पूजयामि नमः' इति त्रिः सम्पूज्य, पुनः 'क-५ वाग्-भवेश्वरि विद्महे, ह–६ कामेश्वरि च धीमहि। स–४ तन्नः शक्तिः प्रचोदयात्' इति तुरीयगायत्रीमुच्चार्य 'श्रीमहात्रिपुरसुन्दरी-

श्रीपादुकायै अर्घ्यं कल्पयामि स्वाहा' इति त्रिरर्घ्यं दत्वा, पुनस्तुरीयकूटमुच्चार्य 'श्रीमहात्रिपुरसुन्दरी-श्रीपादुकां तर्पयामि' इति त्रिः सन्तर्प्य, श्रीगुरुपादुकामुच्चार्य, ततः तुरीयगायत्रीं ततो मूलविद्यां, ततस्तूरीयकूटं च यथाशक्ति जपेत् ।

अथ उपस्थानम्

त्रिपुरा सर्वरूपाणि चराणि स्थावराणि च ।
सायं प्रातस्तु मध्याह्ने सर्वदा सा परा स्थिता ।।
उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि ! यथासुखम् ।।

गुं गुरुभ्यो नमः । दुं दुर्गायै नमः । गं गणपतये नमः । क्षं क्षेत्रपालकाय नमः । सरस्वत्यै नमः । परमात्मने नमः ।

श्रीशिवाचार्यवर्याद्यां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गु परम्पराम् ।।
दिव्यश्रीपादुकां ध्यात्वा परितुष्याम्यहं सदा ।
श्रीगुरुं परमं वन्दे पश्चात्तं परमं गुरुम् ।।
परमेष्ठिगुरुं वन्दे परापरगुरुं भजे ।
आनन्दाख्यगुरुं वन्दे तच्छिष्यस्तत्कृपावशः ।।
श्रीनाथादींश्च सम्पूज्य सम्प्रदायक्रमादहम् ।

योगगोत्रं समुच्चार्य [परमेष्ठिगुरु-परमगुरु-स्वगुरुनामानि आनन्दनाथशब्दवर्जमुच्चार्य] आनन्द-स्वच्छन्दचिद्रूपानन्दगोत्रः अमुका-ऽऽनन्दनाथ अमुकशर्माहं भो अभिवादये ।

इति तुरीयसन्ध्याविधिः ।

*

अथ नामपारायणविधिः

तत्रादौ साधको विविक्तदेशे नद्यादितीरे एकान्ते स्वगृहे स्वासनमास्तीर्य '४ ह्रीं आधारशक्तिकमलासनाय नमः' इत्यासनं सम्पूज्य, तत्र प्राङ्मुखः स्वस्तिकाद्यासनेनोपविश्य, गुरु-गणपतिं स्वेष्टदेवताः प्रणम्य मूलेन प्राणायामत्रयपूर्वकं संक्षेपतो भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं च कृत्वा, मस्तकदक्षबाहु-मूलादिषट्त्रिंशत्स्थानेषु प्रतिस्थानं षोडशदलपद्मं विभाव्य, तेष्वकारादि-क्षकारान्तान् षट्त्रिंशत्तत्त्वर्णान् प्रत्येकं षोडशस्वर-संयुक्तान् विभाव्य मध्ये तत्प्रथमाक्षरं विन्यस्य पूर्वादिदलेषु तत्तदक्षरविकृतषोडशवर्णास्तदादिकान् विन्यसेदित्येवं पूर्णमण्डल-वर्णान् विन्यस्य पुनस्तद्दिन-नित्यविद्यासहित-मूलविद्यया प्राणा-यामत्रयं कृत्वा,

शिरसि—'४ दक्षिणमूर्तिऋषये नमः ।

मुखे—४ पंक्तिच्छन्दसे नमः ।

हृदये—४ कालनित्यारूपिण्यै श्रीमहात्रिपुरसुन्दर्यै नमः' इति ऋष्यादिकं विन्यस्य, 'मम मोक्षार्थे नामपारायणजपे विनियोगः' इति कृत्वाऽञ्जलिरुक्त्वा तद्दिनित्यविद्याक्षरैः त्रिभिर्द्विरावृत्त्या यथाविधि करषडङ्गन्यासं चतुरासनन्यासं वाग्देवताष्टकन्यासं च विधाय ।

रक्तां रक्ताम्बरां रक्तसर्विभूषानुलेपनाम् ।
पाशाङ्कुशेक्षु-कोदण्ड-प्रसून-विशिखां स्मेरत् ॥

इति कालनित्यां हृदये ध्यात्वा, हृदये श्रीचक्रं कालचक्रमध्यगतं विभाव्य, तत्र देवीं सावरणां कालनित्याभिश्च परिवृतां ध्यात्वा, मानसैरुपचारैः सम्पूज्य, पारायणजपमारभेत ।

तत्रादौ अङ्गविद्याजपः—

४ क—१५ दि + हंस अ ह्सौः हंसः
,, ,, आ ,, ,,
❀ ❀ ❀
,, ,, क्ष ,, ,,

इति एकपञ्चाशद्विद्याभिः सह मूलविद्यां जपित्वा, ततः केवलमूलविद्यां त्रिर्जपित्वा ।

'ए वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु हसौः सहाः' इति दीपिनीविद्यामेकवारं जपित्वा ततो गुरुपादुकामेकवारं जपित्वा, पुनः चत्वारिंशद्विद्याभिः सह मूलविद्यां जपेत् । तद्यथा—

४ मूलं	अ	क्षा	हसाई	हंसः
,,	ई	ला	,,	,,
,,	ऊ	हा	,,	,,
,,	ॠ	सा	,,	,,

इत्यष्टधा जपित्वा,

पुनः—

४ मूलं	आ	क्षाई	हंसः	
,,	अ	क्षाई	,,	
,,	ई	लाई	,,	
,,	इ	लाई	,,	
,,	ऊ	हाई	,,	
,,	उ	हाई	,,	
,,	ॠ	साई	,,	
,,	ऋ	साई	,,	
,,	ऌ	षाई	,,	
,,	ॡ	षाई	,,	
,,	ऐ	शाई	,,	
,,	ए	शाई	,,	
,,	औ	वाई	,,	
,,	ओ	वाई	,,	
,,	अः	लाई	,,	
,,	अं	लाई	,,	

इति षोडशधा जपित्वा

४ मूलं	ऌ	षा	हसाई	हंसः
,,	ऐ	शा	,,	,,
,,	औ	वा	,,	,,
,,	अः	ला	,,	,,

४ मूलं	अ	काई	हंसः	
,,	इ	चाई	,,	
,,	उ	टाई	,,	
,,	ॠ	ताई	,,	
,,	ऌ	पाई	,,	
,,	ए	याई	,,	
,,	ओ	शाई	,,	
,,	अं	लाई	,,	

इत्यष्टधा जपित्वा

४ मूलं	आ	क्षाई	हंसः	
,,	ई	लाई	,,	
,,	ऊ	हाई	,,	
,,	ॠ	साई	,,	
,,	ऌ	षाई	,,	
,,	ऐ	शाई	,,	
,,	औ	वाई	,,	
,,	अः	लाई	,,	

इत्यष्टधा जपित्वा

ततः षोडशावान्तयुगभिन्ने महायुगे यदेव युगं भविष्यति तदक्षरमारभ्य सर्वाभिर्दिननित्यविद्याभिः सह मूलं जपेत्। अयमङ्गविद्याजपो वर्गद्वयस्याप्यादौ प्रत्यहं कार्यः।

अथ प्रथमदिने। ४ मूलं अ आई हंसः। ४ मूलं अ काई हंसः···४ मूलं अ क्षाई हंसः ॥३६॥ पुनः ४ मूलं आ आई हंसः। ४ मूलं आ काई हंसः···४ मूलं आ क्षाई हंसः ॥ ३६॥ एवं इ आ, इ का, इ खा···इ क्षा ।३६॥ ई आ, ई का···ई क्षा ॥३६॥ एवम् उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः—एतेषां च अः आई हंसः। अः काई हंसा···अः क्षाई हंसः। इत्यन्तं जपेत्। एवं षट्सप्तत्युत्तरपञ्चशतसंख्याको जपो भवति मूलविद्यायाः। अत्र पारायणे प्रथमं तद्दिनयुगाक्षरात् षोडशस्वरभिन्नादुत्पन्नषट्सप्तत्युत्तरपञ्चशतविद्याभिः सह मूलं जपित्वा, पश्चाशत्तद्दिनाक्षरजनितविद्याभिः तावत्सङ्ख्याभिः सह प्रोक्तक्रमेण मूलं जपेत्। युगाक्षरदिनाऽक्षरे तु तद्दिननित्यविद्यायाः प्रथमाक्षरं द्वितीयाक्षरं च बोध्यम्। युगाक्षरोत्थविद्याजपे विशेषस्तु—यस्मिन् युगे यत्स्वरयुतं युगाक्षरं भवति तत्स्वरमारभ्य प्रतिस्वरं षट्त्रिंशत्क्रमेण तद्विसर्गान्तिमविद्यापर्यन्तं जपित्वा, पुनस्तदक्षरस्य प्रथमस्वरमारभ्य आरब्धस्वरस्य पूर्वस्वरान्तिमविद्यावधि जपेत्। तदा मूलस्य ५७६ जपो भवति। अत्र युगस्तु षट्त्रिंशद्दिनात्मको भवति। प्रागुक्तपूर्णमण्डलवर्णेषु ५७६ संख्याकेषु एकैकाक्षरस्य एकैकयुगं प्रति युगाक्षरत्वं च भवति। एतत्सर्वं दिननित्यविद्याक्रमं च गुरुमुखादेव जानीयात्। एवं द्विपञ्चाशदुत्तरका-

दशशतसंख्याको जपो भवति मूलस्य। अङ्गविद्यायास्तु एकैक-वर्गादौ एकनवतिसंख्याकः। तेन वर्गद्वयादौ जपो द्व्यशीत्युत्तर-शतसंख्याको भवति। केवलं मूलजपोऽपि वारचतुष्टयं त्रिस्रा-वृत्त्या द्वादशधा भवति। एवं संभूय १३४६ संभवन्ति मूलस्य। एवमुक्तसंख्याकजपमुक्तविधिना कृत्वा मूलं त्रिर्जपित्वा '४ मूलं ङरलक्स्ह्रैं ह्सक्लरङीं ह्सकलरङौः' इत्युत्तीर्णविद्यां सकृ-ज्जपित्वा 'मम सकलमनोरथान् साधय साधय तुभ्यं नमः' इति प्रार्थनीविद्यां कृताञ्जलिः सकृज्जपेत्। इति वर्गद्वयस्याप्यन्ते बोध्यम्। इत्थं पारायणजपं कृत्वा स्तोत्रमिदं पठेत्। तद्यथा--

क्ष्माम्बग्नी-रणखार्केन्दु-यष्ट्रप्राय-युगाक्षरैः।
मातृभैरवगां वन्दे देवीं त्रिपुरभैरवीम्।
कादिवर्गाष्टकाकार-समस्ताष्टक-विग्रहाम्।
अष्टशक्त्यावृतां वन्दे देवीं त्रिपुरभैरवीम्॥
स्वरषोडशकानां तु षट्त्रिंशद्भिः पराऽपरैः।
षट्त्रिंशत्तत्त्वगां वन्दे देवीं त्रिपुरभैरवीम्॥
षट्शिंत्तत्त्वसंस्थाप्य शिवचन्द्रकलास्वपि।
कादि-तत्त्वान्तरां वन्दे देवीं त्रिपुरभैरवीम्॥
आईमाया-द्वयोपाधि-विचित्रेन्दुकलावतीम्।
सर्वात्मिकां परां वन्दे देवीं त्रिपुरभैरवीम्॥

षडध्व-पिण्डयोनिस्थ-मण्डलत्रय-कुण्डलीम् ।
लिङ्गत्रयात्मिकां वन्दे देवीं त्रिपुरभैरवीम् ॥
स्वयम्भूहृदयां बाणभ्रूकामाङ्गस्थितेतराम् ।
प्राप्तप्रत्यक्चितिं वन्दे देवीं त्रिपुरभैरवीम् ॥
अक्षान्तरगताशेष-नामरूपक्रियां पराम् ।
शक्तिं विश्वेश्वरीं वन्दे देवीं त्रिपुरभैरवीम् ॥
वर्गान्ते पठितं यत् स्यात् स्तोत्रमेतत्समाहितैः ।
सर्गान् कामानवाप्नोति अन्ते सायुज्यमाप्नुयात् ॥

इति स्तुत्वा जपं देव्यै समर्पयेत् ।

एवं द्वितीयदिने प्राग्वत् अङ्गविद्याजपान्तं विधाय ४ मूलं 'क आई हंसः । क काई हंसः । क खाई हंसः·····क क्षाई हंसः ।' पर्यन्तम् ३६ । 'का आई हंसः । का काई हंसः ।··· का क्षाई हंसः ॥ ३६ ॥ कि आई हंसः । कि काई हंसः । कि काई हंसः ॥ ३६ ॥ एवं की कु कू कृ कॄ वलृ क्लृ के कै को कौ कं कः ।'

एवं षट्त्रिंशद्दिनेषु च प्रागुक्तपरिपाट्या प्रत्यहं १३४६ संख्या यथा भवति तथा जपं कृत्वा वर्गद्वयस्यान्ते स्तोत्रं पठेत् ।

इति वाञ्छाकल्पलतायां नामपारायणविधिः ।

०

शान्ति-पञ्चकम्

(१)

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्माऽसि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ॐ शान्तिः, शान्तिः, शान्तिः ।

(२)

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं नो इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्माऽसि । त्वमेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ॐ शान्तिः, शान्तिः, शान्तिः ।

(३)

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः, शान्तिः, शान्तिः ।

(४)

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो

मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः पराद्मोऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परीदां वैश्वदेवीं वाचमुद्यासं शिवामदस्ताञ्जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च, सूर्यश्च, शर्म ब्रह्म प्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृज उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्त । ॐ शान्तिः, शान्तिः, शान्तिः ।

(५)

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ॐ शान्तिः, शान्तिः, शान्तिः ।

इति शान्ति-पञ्चकं समाप्तम् ।

०

श्रीसूक्तम्

हिरण्यवर्णां हरिणीं सुवर्ण-रजत-स्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ ३ ॥
कां सोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमिं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैति मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ ८ ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥
कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यां प्रभूतं गावो दास्योऽश्वान्विन्देयंपुरुषानहम् ॥१५॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६॥
पद्मानने पद्मऊरू पद्माक्षी पद्मसम्भवे ।
तन्मे भजसि पद्माक्षीं येन सौख्यं लभाम्यहम् ॥१७॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥१८॥
पद्मानने पद्म-विपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रियेविश्वमनोऽनुकूले त्वत्पादपद्मं मयिसंनिधत्स्व ॥१९॥
पुत्र-पौत्र-धनं धान्यं हस्त्यश्वादि-गवेरथम् ।
प्रजानां भवसी माता आयुष्मन्तं करोतु मे ॥२०॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥२१॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥२२॥
न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२३॥
सरसिजनिलये सरोजहस्ते धवलतरांशुक-गन्ध-माल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥२४॥

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥२५॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥२६॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ।२७॥

इति श्रीसूक्तं समाप्तम् ।

०

श्रीसिद्धिलक्ष्मीस्तोत्रम्

विनियोगः

ॐ अस्य श्रीसिद्धिलक्ष्मीस्तोत्रमालामन्त्रस्य हिरण्यगर्भ ऋषिः, अनुष्टुप्छन्दः, श्रीसिद्धिलक्ष्मीर्देवता, मम समस्त-दुःख - क्लेश-पीडा-दारिद्र्य-विनाशनार्थे सर्वलक्ष्मीप्रसन्नवरणार्थं महाकाली-महालक्ष्मी-महासरस्वती देवताप्रीत्यर्थं सिद्धिलक्ष्मीस्तोत्रपाठे जपे च विनियोगः ।

करन्यासः

ॐ सिद्धिलक्ष्मी अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं विष्णुहृदये तर्जनीभ्यां नमः । ॐ क्लीं अमृतानन्दे मध्यमाभ्यां नमः । ॐ श्रीं दैत्यमालिनी अनामिकाभ्यां नमः । ॐ तं तेजःप्रकाशिनी कनिष्ठिकाभ्यां नमः । ॐ ह्रीं क्लीं श्रीं ब्राह्मी वैष्णवी माहेश्वरी करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यासः

ॐ सिद्धिलक्ष्मी हृदयाय नमः। ॐ हां वैष्णवी शिरसे स्वाहा। ॐ क्लीं अमृतानन्दे शिखायै वौषट्। ॐ श्रीं दैत्यमालिनी कवचाय हुम्। ॐ तं तेजः-प्रकाशिनी नेत्रत्रयाय वौषट्। ॐ हीं क्लीं श्रीं ब्राह्मीं वैष्णवीं अस्त्राय फट्।

ध्यानम्

ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखाम्।
त्रिनेत्रां च त्रिशूलां च पद्म-चक्र-गदाधराम्॥ १॥
पीताम्बरधरां देवीं नानालङ्कारभूषिताम्।
तेजःपुञ्जधरां श्रेष्ठां ध्यायेद् बालकुमारिकाम्॥ २॥
ॐकारलक्ष्मीरूपेण विष्णुहृदयमव्ययम्।
विष्णुमानन्दमध्यस्थं हींकारबीजरूपिणी॥ ३॥
ॐ क्लीं अमृतानन्दभद्रे सद्य आनन्ददायिनी।
ॐ श्रीं दैत्यमक्षरदां शक्तिमालिनी शत्रुमर्दिनी॥ ४॥
तेजःप्रकाशिनी देवी वरदा शुभकारिणी।
ब्राह्मी च वैष्णवी भद्रा कालिका रक्तशाम्भवी॥ ५॥
आकारब्रह्मरूपेण ॐकारं विष्णुमव्ययम्।
सिद्धिलक्ष्मि! परालक्ष्मि! लक्ष्यलक्ष्मि! नमोऽस्तु ते॥ ६॥
सूर्यकोटिप्रतीकाशं चन्द्रकोटिसमप्रभम्।
तन्मध्ये निकरे सूक्ष्मं ब्रह्मरूपव्यवस्थितम्॥ ७॥
ॐकारपरमानन्दं क्रियते सुखसम्पदा।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके॥ ८॥

प्रथमे त्र्यम्बका गौरी द्वितीये वैष्णवी तथा ।
तृतीये कमला प्रोक्ता चतुर्थे सुरसुन्दरी ॥ ९ ॥
पञ्चमे विष्णुपत्नी च षष्ठं च वैष्णवी तथा ।
सप्तमे च वराराहा अष्टमे वरदायिनी ॥१०॥
नवमे षड्गत्रिशूला दशमे देवदेवता ।
एकादशे सिद्धिलक्ष्मीर्द्वादशे ललितात्मिका ॥११॥
एतत् स्तोत्रं पठन्तस्त्वां स्तुवन्ति भुवि मानवाः ।
सर्वोपद्रवमुक्तास्ते नाऽत्र कार्या विचारणा ॥१२॥
एकमासं द्विमासं वा त्रिमासं च चतुर्थकम् ।
पञ्चमासं च षण्मासं त्रिकालं यः पठेन्नरः ॥१३॥
ब्राह्मणा क्लेशता दुःखो दरिद्रा भयपीडिता ।
जन्मान्तर - सहस्रेषु मुच्यते सर्वक्लेशतः ॥१४॥
अलक्ष्मीर्लभते लक्ष्मीमपुत्रो पुत्रवर्धनम् ।
धन्यं यशस्यमायुष्यं वह्नि - चौर - भयेषु च ॥१५॥
शाकिनी - भूत - वेताला सर्वव्याधि - निपातके ।
राजद्वारे महाघोरे संग्रामे रिपुसङ्कटे ॥१६॥
सभास्थाने स्मशाने च कारागृहादिबन्धने ॥१७॥
ईश्वरेण कृतं स्तोत्रं प्राणिनां हितकारकम् ।
स्तुवन्ति ब्राह्मणा नित्यं दारिद्र्यं न च वर्धते ॥१८॥
या श्रीः पद्मवने कदम्बशिखरे राजगृहे कुञ्जरे
श्वेते चाऽश्वयुते वृषे च युगले यज्ञे च यूपस्थिते ।

शङ्खे देवकुले नरेन्द्रभवने गङ्गातटे गोकुले
या श्रीस्तिष्ठति सर्वदा मम गृहे भूयात् सदा निश्चला ॥१९॥

इति श्रीब्रह्माण्डपुराणे ईश्वर-विष्णुसंवादे
दारिद्र्यनाशन-सिद्धिलक्ष्मीस्तोत्रं सम्पूर्णम् ।

०

श्रीलक्ष्मीस्तवराजस्तोत्रम्

[1]श्रीमद्वेङ्कटनाथार्य - कवितार्किक - केसरी ।
वेदान्ताचार्य-वर्य्यो मे सन्निधत्तां सदा हृदि ॥ १ ॥

ईशानां जगतोऽस्य वेङ्कटपते-र्विष्णोः परां प्रेयसीं
लद्वक्षः-स्थल-नित्य-वासरसिकां तत्क्षान्ति-संवर्धनीम् ।
पद्मालङ्कृत-पाणि-पल्लवयुतां पद्मासनस्थां श्रियं
वात्सल्यादि-गुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥२॥

[3]मानेप्रीति - ग्रथित - विभवां मङ्गलं मङ्गलानां
[4]वक्षःपीठे मधुविजयिनीं [5]भूषयन्तीं [6]स्वकान्त्या ।
प्रत्यक्षानु - श्रविकमहिम - प्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं[7] श्रियमशरणस्त्वां शरण्यां प्रपद्ये ।३॥

आविर्भावः कलश-जलधावभ्यरे वाऽपि यस्याः
स्थानं यस्याः सरसिज - वनं विष्णुवक्षः - स्थलं वा ।
भूमौ यस्या भुवनमखिलं देवि ! दिव्यं पदं वा
स्तोक - प्रज्ञै-रनवधिगुणा स्तूयसे सा कथं त्वम् ? ॥४॥

---

१. 'श्रीमान् वेङ्कटनाथार्य्यः' इति पाठान्तरम् । २. क्वचित्पुस्तके इदं श्लोकद्वयं नास्ति । ३. 'मानातीत' इति पा० । ४. 'पीठी' इति । ५. 'ना' इति क्वचित्पुस्तके । ६. 'न्ती' इति । ७. 'मूर्तिं' इति पा० । ८. 'मूमा' इति ।

[1]स्तोतव्यं स्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामविरतगतिः [2]स्तोतु - मार्शंसमानः ।
सिद्धारम्भः सकलभुवन - श्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥५॥

यत्सङ्कल्पाद् भवति कमले ! यत्र देहिन्यमीषां
जन्म[3]स्थान - प्रलयरचना जङ्गमाऽजङ्गमानाम् ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेज[4]स्स्फुरति भवती पाद - लाक्षा - रसाङ्कम् ॥६॥

निष्प्रत्यूह - प्रणयघटितं देवि ! नित्यानपायं
विष्णुस्त्वं चेद[5]नवधिगुण[6] - र्द्वन्द्वमन्योन्य - लक्ष्यम् ।
शेषश्चित्तं विमल - मनसां मौलयश्च श्रुतीनां
सम्पद्यन्ते विहरण - विधौ यस्य शय्याविशेषाः ॥७॥

उद्देश्यस्त्वं[7]जजननि भजतो रुज्झितोपाधि-गन्धं
प्रत्यग्रूपे हविषि युवयो - रेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमै - र्नित्यमन्विष्यमाणो
नाऽवच्छेदं भजति महिमा नर्तयन् मानसं नः ॥८॥

पश्यन्तीषु श्रुतिषु परितः [8]देवतृन्देन [10]सार्द्धं
मध्येकृत्यं[11] त्रिगुण-फलकं [12]निर्मितं स्थानभेदम् ।

---

१. 'स्तोतव्यत्व' इति । २. 'त्वामनिरत' । ३. 'जन्मस्थेय' । ४. 'तेजः-स्फुरति' । ५. 'पाय' । ६. 'चेत्य' । ७. 'गुणं' । ८. 'स्वं जननि' । ९. 'सूचि' इति । १०. 'सार्धं' । ११. 'कृत्य' । १२. 'निर्मित' इति ।

विश्वाधीशं[1] प्रणयति सदा विभ्रमद्यूतधृत्तौ
ब्रह्मेशाद्या दधति [2]युवयो रक्ष सारप्रचारम् ।।९।।

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधि - तनया विष्णुपत्नीन्दिरेति ।
यन्नामानि[3] [4]श्रुति-परिमलान्येवमावर्त्तयन्तो
नावर्तन्ते दुरितपवन - प्रेरिते जन्मचक्रे ।।१०।।

त्वौ मे बाहुः कतिचिदपरे त्वत्प्रियं [6]लोकनाथं
किं तैरन्तःकलह-मलिनः किञ्चिदुत्तीर्य मग्नैः ।
भावारूढौ भगवति युवां[7] दैवतं [8]दम्पती नः ।।११।।

आपन्नार्त्ति - प्रशमनविधौ बद्धदक्षस्य[9] विष्णोः-
राचख्युस्त्वां प्रियसहचरीमेक - मत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राप्तमुन्नीयसे[10] त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ।।१२।।

धत्ते शोभां हरिमरकते [11]तावकी मूर्तिराद्याः
तन्वी तुङ्गस्तन - भर - नता तप्तजाम्बूनदाभा ।
यस्यां [12]गच्छत्युदय - विलयैर्नित्यमानन्द - सिन्धा-
[13]वुत्पद्यन्ते ललित - लहरी - विभ्रमं व्यक्तयस्ते ।।१३।।

---

१. 'विश्वाधीश प्रणयिनि' इति । २. 'युवयोरक्षशारप्रचारम्' । ३. 'मैक' । ४. 'श्रुतिपरिपणान्येव' । ५. 'त्वामेवाहुः' । ६. 'नैं' । ७. 'युवां' । ८. 'दम्पती दैवते नः' । ९. 'दीक्षस्य' इति पा० । १० 'प्रादुर्भावमन्वीयसे' । ११. 'स्तावकी' इति । १२. 'गच्छन्त्युदय' । १३. 'विच्छ्रावेगोल्लसितलहरी' ।

आसंसारं विततमखिलं वाङ्मयं यद्विभूति-
र्यद्भ्रूभङ्गात् कुसुम - धनुषः किङ्करो मेरुधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो[1] महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥१४॥

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णा-
मम्भोराशेरधिगत - सुधा - सम्प्लवादुत्थितां त्वाम् ।
पुष्पासार - स्थगित - भुवनैः पुष्कलावर्त - कार्यै[2]-
र्दीप्तारम्भाः[3] कनक - कलशैरभ्यषिञ्चन् गजेन्द्राः ॥१५॥

आलोक्य त्वाममृत - सहजे विष्णुवक्षः - स्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं रक्षितं[4] त्वत्कटाक्षैः
सर्वाकार-स्थिर-समुदयां सम्पदं निर्विशन्ति ॥१६॥

आर्त्तत्राण - व्रतिभिरमृता - सार - निम्नाम्बुवाहै-
रम्भोजानामुपरि[5] मिषतामन्तरङ्गैरपाङ्गैः[6] ।
यस्यां यस्यां दिशि विहरते देवि ! दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते सम्पदोघाः ॥१७॥

योगारम्भ - त्वरितमनसो युष्मदेकान्तयुक्तं
धर्म्मं प्राप्तं[7] प्रथममिह ये धारयन्ते धनार्यं[8]
तेषां भूमेर्धनपति - गृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥१८॥

---

१. 'लक्षो' । २. 'कार्यैः' । ३, वलृप्तारम्भाः' । ४. 'लक्षितं' । ५. 'मुषसि' ६ 'मङ्गरङ्गैः' । ७. 'युष्मदेकान्त' । ८ 'प्राप्तु' । ९. 'धनायाम्' ।

श्रेयस्कामाः कमल - निलये चित्रमाम्नायवाचां
चूडापीठं[1] तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छाया - सुभग-शिरस - श्चामर - स्मेर-पार्श्वाः
श्लाघाशब्द - श्रवण-मुदिताः सूरिणः[2] सञ्चरन्ति ॥१९॥
ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दूरितमखिलं[3] त्यक्तमाद्यामविद्याम् ।
ब्रह्मस्तम्बावधिक - जननं[4] ग्राम - सीमान्तरेखा-
मालम्बन्ते विमल-मनसो विष्णुकान्ते दयान्ते[5] ॥२०॥
जाताकांक्षा जननि ! युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभंग - प्रशमनफलं वैदिकं[6] धर्मसेतुम् ॥२१॥
सेवे देवि ! त्रिदशमहिला - मौलिमालार्चितं[7] ते
सिद्धि-क्षेत्रं शमित-विपदां सम्पदां पादपद्मम् ।
यस्मिन्नीपन्नमित - शिरसो क्षापयित्वा[8] शरीरं
वर्तिष्यन्ते व्रितमसि पदे वासुदेवस्य धन्याः ॥२२॥
[10]सामप्राय-प्रकटितदयैः [11]शान्त-वात्सल्य-दिग्धै-
[12]रम्भःस्निग्धैरमृत - लहरी - लब्ध - सद्ब्रह्मचर्यैः ।
धर्मे तापत्रयविरचिते गाढ - तप्तं क्षणं मा-
माकिञ्चन्य - ग्लपित - मनघे - राद्रियेथाः कटाक्षैः ॥२३॥

---

१. 'पीडं' । २. 'स्रग्विणः' । ३. 'दुरितनिवहं' । ४. 'अम्ब' । ५. 'जनन' । ६. 'ते' । ७. 'क' इति । ८. 'मालोचितं' इति पा० । ९. 'यापयित्वा' १०. 'सान' 'सानुप्रास' । ११. 'सान्द्र' । १२. 'रम्ब' ।

[1]सम्पद्यन्ते भव - भय - [2]तमो मानवस्त्वत्प्रसादाद्
भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः [3]शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥२४॥
माता देवि ! त्वमसि कमले ! वासुदेवः पिता मे
जातः [4]सोऽयं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया [5]देशिकैरप्यतस्त्वां
किं ते भूयः प्रियमिति किल स्मेर-वक्त्रा विभासि ॥२५॥
कल्याणानामविकल-निधिः काऽपि कारुण्य-सीमा
नित्यामोदा निगम-वचसां मौलि-मन्दार-माला ।
सम्पद्-दिव्या-मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकल - भुवन - प्रार्थना - कामधेनुः ॥२६॥
उपचित - गुरुभक्त - रुत्थितं वेङ्कटेशात्
कलि - कलुष - निवृत्त्यै कल्प्यमानं प्रजानाम् ।
सरसिज - निलयायाः स्तोत्रमेतत् पठन्तः
सकल - कुशल - सीमा सार्वभौमा भवन्ति ॥२७॥
कवि - तार्किक - सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्त - गुरवे नमः ॥२८॥

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिसंस्कृतायां वाञ्छाकल्पलतायां सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटेशनाथस्य वेदान्ताचार्य्यस्य कृतिषु कनकधारा-श्रीलक्ष्मीस्तवराजः सम्पूर्णः ।

---

१. संरद्यते । २. 'तमीमानव' । ३. 'शीला' । ४. 'भगवान्' । ५. 'सोऽहं' । ६. 'दैशिकै' । ७. 'स्त्वं' इति पा० । ८. 'कल्पमाना' । ९. क्वचित्पुस्तके इदं श्लोकं नास्ति ।

धनदा-लक्ष्मी-स्तोत्रम्

धनद उवाच

देवी देवमुपागम्य नीलकण्ठं तनुप्रियम् ।
कृपया पार्वती प्राह शङ्करं करुणाकरम् ॥ १ ॥

देव्युवाच

ब्रूहि वल्लभ साधूनां दरिद्राणां कुटुम्बिनाम् ।
दरिद्र-दलनोपायमञ्जसैव धनप्रदम् ॥ २ ॥

पूजयन् पार्वतीवाक्यमिदमाह महेश्वरः ।

शिव उवाच

उचितं जगदम्बा त्वं तव भूतानुकम्पया ॥ ३ ॥
स-सीतं साऽनुजं रामं साऽञ्जनेयं सहाऽनुगम् ।
प्रणम्य परमानन्दं वक्ष्येऽहं स्तोत्रमुत्तमम् ॥ ४ ॥
धनदं श्रद्दधानानां सद्यः सुलभकारकम् ।
योगक्षेमकरं सत्यं सत्यमेव वचो मम ॥ ५ ॥
पठन्तं पाठयन्तं वा ब्राह्मणैरास्तिकोत्तमैः ।
धनलाभो भवेदाशु नाशमेति दरिद्रता ॥ ६ ॥
भूभवांशभवां भूत्यै भक्तिकल्पलतां शुभाम् ।
प्रार्थयेत यथाकामान् कामधेनुस्वरूपिणीम् । ७ ॥
धनदे ! धनपे देवि ! दानशीले ! दयाकरे ! ।
त्वं प्रसीद महेशानि ! यदर्थं प्रार्थयाम्यहम् ॥ ८ ॥
धराऽमरप्रिये ! पुण्ये ! धन्ये धनदपूजिते ! ।
सुधनं धार्मिकं देहि यजमानाय सत्वरम् ॥ ९ ॥
रम्ये ! रुद्रप्रियेऽपर्णे ! रमारूपे ! रतिप्रिये ।
शिखा-सख्यमनो मूर्ते प्रसीद प्रणते मयि ।१०॥
आरक्त-चरणाम्भोजे सिद्धि-सर्वार्थदायिनि ! ।
दिव्याम्बरधरे ! दिव्ये ! दिव्यमाल्यानुशोभिते ! ॥११॥

समस्तगुणसम्पन्ने ! सर्वलक्षणलक्षिते ! ।
शरच्चन्द्रमुखे नीले नील-नीरज-लोचने ! ॥१२॥

चञ्चरीक-चमू-चारु-श्रीहार-कुटिलालके ! ।
दिव्ये दिव्यवरे ! श्रीदे ! कलकण्ठरवामृते ! ॥१३॥

हासो-ऽवलोकनैर्दिव्यैर्भक्त-चिन्तापहारके ! ।
रूप - लावण्य-तारुण्य - कारुण्य - गुणभाजने ! ॥१४॥

क्वणत् - कङ्कण-मञ्जीरे ! रसलीलाऽऽकराम्बुजे ! ।
रुद्रव्यक्तमहत्तत्त्वे ! धर्माधारे ! धरालये ! ॥१५॥

प्रयच्छ यजमानाय धनं धर्मैकसाधनम् ।
मातस्त्वं वाऽविलम्बेन ददस्व जगदम्बिके ! ॥१६॥

कृपाऽब्धे करुणागारे ! प्रार्थये चाऽऽशु सिद्धये ।
वसुधे ! वसुधारूपे ! वसु-वासव-वन्दिते ! ॥१७॥

प्रार्थिने च धनं देहि वरदे ! वरदा भव ।
ब्रह्मणा ब्राह्मणैः पूज्या त्वया च शङ्करो यथा ॥१८॥

श्रीकरे ! शङ्करे ! श्रीदे ! प्रसीद मयि किङ्करे ! ।
स्तोत्रं दारिद्र्य-कष्टार्त-शमनं सुधनप्रदम् ॥१९॥

पार्वतीश-प्रसादेन सुरेश-किंकरे स्थितम् ।
मह्यं प्रयच्छ मातस्त्वं त्वामहं शरणं गतः ॥२०॥

पाठफलम्

श्रद्धया ये पठिष्यन्ति पाठयिष्यन्ति भक्तितः ।
सहस्रमयुतं लक्षं धनलाभो भवेद् [1]ध्रुवम् ॥२१॥

इति श्रीसद्यःप्राप्तिकारकं धनदाप्रोक्तं धनदा-लक्ष्मी-स्तोत्रं सम्पूर्णम् ।

१. शिव लये कदलीवने वा, पश्चिमाभिमुखमाश्रित्य लिङ्गाश्रितवृक्षसमीपे वा, देवव्यालये विल्वमूले वा, हविष्याशी सन् ब्रह्मचर्यादिनियमं विधाय प्रत्यहं शतावर्तनानि कुर्यात् । यथोक्तसंख्याचतुष्टये कृते धनदा-लक्ष्मीर्वश्या भवति । उक्तसंख्याकं धन प्रयच्छति, अब्दमध्ये सिद्धिर्भवति ।